✧˖°*❋ ❋*°˖✧

# নাম রামাযণম্

## Naam Ramayan

in bengali

✧˖°*❋ ❋*°˖✧

# ॥ নাম রামাযণম্ ॥

## ॥ বালকাংডঃ ॥

শুদ্ধব্রহ্মপরাত্পর রাম ।
কালাত্মকপরমেশ্বর রাম ।
শেষতল্পসুখনিদ্রিত রাম ।
ব্রহ্মাদ্যমরপ্রার্থিত রাম ।
চংডকিরণকুলমংডন রাম ।
শ্রীমদ্দশরথনংদন রাম ।
কৌসল্যাসুখবর্ধন রাম ।
বিশ্বামিত্রপ্রিযধন রাম ।
ঘোরতাটকাঘাতক রাম ।
মারীচাদিনিপাতক রাম । 10 ।
কৌশিকমখসংরক্ষক রাম ।
শ্রীমদহল্যোদ্ধারক রাম ।
গৌতমমুনিসংপূজিত রাম ।
সুরমুনিবরগণসংস্তুত রাম ।
নাবিকধাবিকমৃদুপদ রাম ।
মিথিলাপুরজনমোহক রাম ।
বিদেহমানসরংজক রাম ।
ত্র্যংবককার্মুখভংজক রাম ।
সীতার্পিতবরমালিক রাম ।
কৃতবৈবাহিককৌতুক রাম । 20 ।
ভার্গবদর্পবিনাশক রাম ।
শ্রীমদযোধ্যাপালক রাম ॥

রাম রাম জয রাজা রাম ।
রাম রাম জয সীতা রাম ॥

## ॥ অযোধ্যাকাংডঃ ॥

অগণিতগুণগণভূষিত রাম ।
অবনীতনযাকামিত রাম ।
রাকাচংদ্রসমানন রাম ।
পিতৃবাক্যাশ্রিতকানন রাম ।
প্রিযগুহবিনিবেদিতপদ রাম ।
তত্ক্ষালিতনিজমৃদুপদ রাম ।
ভরদ্বাজমুখানংদক রাম ।
চিত্রকূটাদ্রিনিকেতন রাম । ৩০ ।
দশরথসংততচিংতিত রাম ।
কৈকেযীতনযার্পিত রাম ।
বিরচিতনিজপিতৃকর্মক রাম ।
ভরতার্পিতনিজপাদুক রাম ॥

রাম রাম জয রাজা রাম ।
রাম রাম জয সীতা রাম ॥

## ॥ অরণ্যকাংডঃ ॥

দংডকাবনজনপাবন রাম ।
দুষ্টবিরাধবিনাশন রাম ।
শরভংগসুতীক্ষ্ণার্চিত রাম ।
অগস্ত্যানুগ্রহবর্দিত রাম ।
গৃধ্রাধিপসংসেবিত রাম ।
পংচবটীতটসুস্থিত রাম । ৪০ ।
শূর্পণখার্ত্তিবিধাযক রাম ।
খরদূষণমুখসূদক রাম ।
সীতাপ্রিযহরিণানুগ রাম ।
মারীচার্তিকৃতাশুগ রাম ।
বিনষ্টসীতান্বেষক রাম ।
গৃধ্রাধিপগতিদাযক রাম ।

শবরীদত্তফলাশন রাম ।
কবংধবাহুচ্ছেদন রাম ॥

রাম রাম জয রাজা রাম ।
রাম রাম জয সীতা রাম ॥

**॥ কিষ্কিংধাকাংডঃ ॥**

হনুমত্সেবিতনিজপদ রাম ।
নতসুগ্রীবাভীষ্টদ রাম । 50 ।
গর্বিতবালিসংহারক রাম ।
বানরদূতপ্রেষক রাম ।
হিতকরলক্ষ্মণসংযুত রাম ।
রাম রাম জয রাজা রাম ।
রাম রাম জয সীতা রাম ।
॥ সুংদরকাংডঃ ॥

কপিবরসংততসংস্মৃত রাম ।
তদ্গতিবিঘ্নধ্বংসক রাম ।
সীতাপ্রাণাধারক রাম ।
দুষ্টদশাননদূষিত রাম ।
শিষ্টহনূমদ্ভূষিত রাম ।
সীতাবেদিতকাকাবন রাম ।
কৃতচূডামণিদর্শন রাম । 60 ।
কপিবরবচনাশ্বাসিত রাম ॥

রাম রাম জয রাজা রাম ।
রাম রাম জয সীতা রাম ॥

## ॥ যুদ্ধকাংডঃ ॥

রাবণনিধনপ্রস্থিত রাম ।
বানরসৈন্যসমাবৃত রাম ।
শোষিতশরদীশার্ত্তিত রাম ।
বিভীষ্ণাভযদাযক রাম ।
পর্বতসেতুনিবংধক রাম ।
কুংভকর্ণশিরশ্ছেদক রাম ।
রাক্ষসসংঘবিমর্ধক রাম ।
অহিমহিরাবণচারণ রাম ।
সংহৃতদশমুখরাবণ রাম । ৭০ ।
বিধিভবমুখসুরসংস্তুত রাম ।
খঃস্থিতদশরথবীক্ষিত রাম ।
সীতাদর্শনমোদিত রাম ।
অভিষিক্তবিভীষণনুত রাম ।
পুষ্পকযানারোহণ রাম ।
ভরদ্বাজাদিনিষেবণ রাম ।
ভরতপ্রাণপ্রিযকর রাম ।
সাকেতপুরীভূষণ রাম ।
সকলস্বীযসমানত রাম ।
রত্নলসত্পীঠাস্থিত রাম । ৪০ ।
পট্টাভিষেকালংকৃত রাম ।
পার্থিবকুলসম্মানিত রাম ।
বিভীষণার্পিতরংগক রাম ।
কীশকুলানুগ্রহকর রাম ।
সকলজীবসংরক্ষক রাম ।
সমস্তলোকোদ্ধারক রাম ॥
রাম রাম জয রাজা রাম ।
রাম রাম জয সীতা রাম ॥

## ॥ উত্তরকাংডঃ ॥

আগত মুনিগণ সংস্তুত রাম ।
বিশ্রুতদশকংঠোদ্ভব রাম ।
সীতালিংগননির্বৃত রাম ।
নীতিসুরক্ষিতজনপদ রাম । ৭০ ।
বিপিনত্যাজিতজনকজ রাম ।
কারিতলবণাসুরবধ রাম ।
স্বর্গতশংবুক সংস্তুত রাম ।
স্বতনযকুশলবনংদিত রাম ।
অশ্বমেধক্রতুদীক্ষিত রাম ।
কালাবেদিতসুরপদ রাম ।
আযোধ্যকজনমুক্তিত রাম ।
বিধিমুখবিভুদানংদক রাম ।
তেজোমযনিজরূপক রাম ।
সংসৃতিবংধবিমোচক রাম । 100 ।
ধর্মস্থাপনতত্পর রাম ।
ভক্তিপরাযণমুক্তিদ রাম ।
সর্বচরাচরপালক রাম ।
সর্বভবামযবারক রাম ।
বৈকুংঠালযসংস্তিত রাম ।
নিত্যনংদপদস্তিত রাম ॥

রাম রাম জয রাজা রাম ॥
রাম রাম জয সীতা রাম ॥ 108 ॥

**ইতি শ্রীলক্ষ্মণাচার্যবিরচিতং নামরামাযণং সংপূর্ণম্ ।**

✧˳·˖°*❋ ❋*°˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net